प्रति

स्थिति ५

लः

१

श्रु० टि० १

॥श्रीगणेशायनमः॥ विलसच्चितिवलनस्फुरदखिलस्वकृतमायापरिनिर्मितविपुलद्वयपिहितस्वकमहिमा व्यवहारिकवपुषाविधिवचनादिकविषयोममप्रमानप्रनिलयोहरिरवताज्जगदखिलं २ श्रीकृष्णंप्रत्यगात्मानंभक्त्यानत्वागुरूनपिटीकामहंकरिष्यामित्रोटकश्लोकगामिनी २ नत्वैलोक्यनाथहरिमीड्यमित्यादिना ग्रन्थेष्टदेवतागुरुनमस्कारव्याजेनग्रन्थारिप्सितस्यप्रकरणस्यविषयसंबंधप्रयोजनानिसूचयति॥ प्रकरणंनामशास्त्रैकदेशसंबद्धंशास्त्रकार्यांतरे स्थितंतच्चैणैरुच्यते शास्त्रैकदेशसंबद्धंशास्त्रकार्यांतरेस्थितंग्राहुः प्रकरणंनामग्रंथभेदंविपश्चितइतिस्मरणात् एकप्रयोजनंप्रतिपाद्यार्थजातस्यकार्त्स्न्येनप्रतिपादकोग्रंथः शास्त्रमितीहशास्त्रलक्षणंशारीरकशास्त्रैकदेशसंबद्धंचेदंप्रकरणंश्रुतिसारसमुद्धरणाख्यंनिर्गुणब्रह्मैक्यप्रतिपाद्यासाधारणन्यायमाश्रित्यप्रतिपादनत्वात्समन्वयाविरोधसाधनफलार्थकत्रयप्रतिपादकत्वेसत्यपितथाशास्त्रकार्यांतरावस्थितत्वमयस्यास्त्येवानेनशास्त्रार्थस्यसंक्षेपतः प्रदर्शनात् ततश्चास्यापिनदीयैरेवविषयसंबंधप्रयोजनैर्विषयसंबंधप्रयोजनत्वोपपत्तिः किमनेनवृथाग्विषयसंबंधप्रयोजनोपन्यासेनसत्यमेतत्यापिश्रोतृणांश्रद्दधतांगतयाशारीरकशास्त्रसंबंधान्येवविषयसंबंधप्रयोजनानिप्रकरणारंभसमयेस्मारयतीत्यदोषः स्थितेचैवमस्मिंश्लोकस्यविषयादिकथनतात्पर्यंशंकोत्तरत्वेनायंश्लोकोऽवतारयितव्यइतिशंकाप्रदर्शयते नेदंप्रकरणमारब्धव्यंविषयसंबंधप्रयोजनाभावात्तथाचश्रुतयः प्रसिद्धत्वेनप्रसिद्धत्वेचतदसंभवात् तथाहि॥ ब्रह्मवेदांतशास्त्रमंतरेणान्यतः प्रसिद्धतद्

CC-0. Lala Bahadur Shastri Rashtriya Sanskrit Vidyapeeth, Delhi. Digitized by Siddhanta eGangotri Gyaan



CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham